म्येषु माला सौम्यहीनकेंद्रगेषु पापेषु सर्प इति कथं ज्ञातं। वचनात्। यतो बादरायणः। केंद्रेषु पापेषु शुभे
तरत्रजी। वेष्टि केंद्रसंस्थैः कथयंति मालां। सर्पश्च सौम्येषु यमारसूर्यैः योगाविमौ द्वौ कथितौ दलाख्यावि
ति॥२॥ आश्रयदलयोगाः सत्यपरासरमते नोक्तास्तत्र त्वमनाभावे कारणमुपजात्याह॥ योगाइति॥ र
ज्जुमुशलनलयोगाश्चाकृतियोगो यवपद्मवज्रविहगगोलकेदारदीपदाऊदाशकटम्यांगोलसयुग
शूलकेदारैः सरव्यापो गेश्रसा दृश्यं प्राभुवंतीत्यतो नोक्ताः। दलयोगौ पाला सर्परव्यौ तु केंद्रगतग्र
हफलेन पुनरुक्तौ। ततोन्ये नोक्तौ। तदुक्तं। केंद्रादित्रिकोणोशुभाशुभाः प्रशस्तास्तेष्वेवपापानशुभप्रदः
स्युरिति। तर्हि तान्यां किमित्युक्तौ। नामसमसंज्ञा विशेषादित्येवमाति॥३॥ अथ यावंति योगान्यंवगदा
शकटविहगाश्रृंगाटकहलाख्यान्तसंततिलके नाह॥ आसन्नेति॥ निकटवर्त्तिकेंद्रद्वयौः सर्वैर्गदितियो

राम

ररा शिवर्त्तुच्छे वा यदा सर्वे ग्रहाः। स्थिरादिस्वभावाश्चरन्यास्तदा रज्जुयोगः॥ एवं स्थिरराशावेव सर्वेऽन्य
त्रन्यास्तदा मुशलयोगः। २ एवं द्विस्वभावे राशौ यदा सर्वे। तदा नलयोगः॥३ तथा च सत्यः। सर्वैश्चरे
षु राशिषु यदा स्थिता योगमाहुर्नरं रज्जु। अनयप्रियपर्यटनरतं विदेशवासार्थयुक्तस्या। सर्वैः स्थि
रेषु राशिषु यदा स्थिता मुशलमाहुर्मतं योगं। जन्मनि कर्मकराणां पुत्रानामधमानाभ्यां॥२ द्विश
रीरेषु नल इति योगो हीनातिरिक्तदेहानां। निपुणानां पुरुषाणां धनसंचयमेभागीनां भवतीति। अ
त्र केचिदाहुः। चराचलुच्छे सर्वे रज्जुः। स्थिरचलुच्छे मुशलं। द्वंगचलुच्छे नल इति। तदयुक्तं। यतो योगा नि:।
एको द्वौ वान्यपतः सर्वे चराः सर्वैर्हि पुनः। चरयोगस्तदा रज्जुः स्या धनांजन्यजै दो भवेत्। स्थिरस्थैर्मु
शलं नाम मानिनां जन्मनां। द्विस्वभावेन नारव्यस्तु धनिनां परिकीर्त्तित इति। केंद्रैरिति। शुभा
भाशुभयुतैः केंद्रैर्मालासर्पाख्यौ दलयोगौ पराशरेणोक्तौ। अयमर्थः। येषु त्रेषु त्रिषु केंद्रेषु यदा
बुधगुरुशुक्राः स्युः। न कुत्रापि केंद्रे पापस्तदा मालायोगः। अथ येषु तेषु त्रिषु केंद्रेषु रविशनिकुजाः।
न कुत्रापि केंद्रे सौम्यस्तदा सर्पयोगः। ननु वंद्रो विभुक्तः न सापस्तयोः शुभोऽशुभश्च। तद्योगादपि मालास

टकेति॥ लग्नाद्यैः केंद्रैः कृत्वा केंद्रादितश्चतुर्ग्रहगैः सर्वग्रहैः पूर्पाद्यः स्युः॥ तथाहि॥ लग्नद्वितीयतृतीयचतु
र्थगैः सर्वग्रहैः पूपः॥१ चतुर्थपंचमषष्ठसप्तमैः सर्वैः शरयोगः॥२ सप्तमाष्टमनवमदशमैः सर्वैः शक्तियो
गः॥३ दशमैकादशद्वादशलग्नगैः सर्वैर्दंडयोगः॥४॥ नावादियोगपंचकमाह॥ नौकूटेति॥ तद्वत् लग्ना
दिकेंद्रेभ्य आरभ्य सप्तस्थानस्थैः सप्तग्रहैर्नावादियोगचतुष्टयं भवति॥ अयमर्थः॥ लग्नद्वितीयतृतीयस
चतुर्थपंचमषष्ठसप्तमेषु यदा सर्वे ग्रहाः स्युस्तदा नौयोगः॥१ एवं चतुर्थादिदशमांतेषु यदा सर्वे तदा कूटयो
गः॥२ सप्तमादिलग्नांतेषु यदा सर्वे तदा छत्रयोगः॥३ दशमाच्चतुर्थांतेषु यदा सर्वे तदा चापयोगः॥४ अर्द्धचं
द्र इति॥ नावाद्येरेवान्यत्रेषु केंद्रपतितेतरेषु स्थितैरर्द्धचंद्रयोगः॥ तद्यथा॥ पणफरेभ्य आपोक्लिमेभ्यो
वारूपतिरंतरं सप्तगृहेषु यदा सर्वे ग्रहास्तदार्द्धचंद्रः॥ सोऽष्टविधः॥ द्वितीयाद्यष्टमांतेषु यदा स
र्वे तदैकः॥१ तृतीयादिनवमांतेषु सर्वेषु द्वितीयः॥२ पंचमाद्येकादशांतेषु सर्वेषु तृतीयः॥३ षष्ठादिद्वा
दशांतेषु सर्वेषु चतुर्थः॥४ अष्टमादिद्वितीयांतेषु सर्वेषु पंचमः॥५ नवमादितृतीयांतेषु सर्वेषु षष्ठः॥६ एका राम ७१

गः॥ स चतुर्विधः। लग्नचतुर्थगैः सर्वग्रहैरेकः॥१ चतुर्थसप्तमे द्वितीयः॥२ सप्तमदशमैस्तृतीयः॥३ दशमल-
ग्नगैश्चतुर्थः॥४ इति। लग्नसप्तमगैः सर्वैः शकटयोगः। दशमचतुर्थैः सर्वैर्विहगयोगः। नवमपंचमलग्न-
स्थैः सर्वैः शृंगाटकयोगः॥४ लग्नवर्जैः सर्वैः परस्परत्रिकोणगैर्हलयोगः। स त्रिविधः। द्वितीयषष्ठदशमेः
सर्वैरेकः। तृतीयसप्तमैकादशे द्वितीयः॥२ चतुर्थाष्टमद्वादशैस्तृतीयः॥३ इति॥४॥ वज्रयवयवमभवा-
पीसंज्ञयोगचतुष्टयं वैतालीयेनाह॥ शकटेति॥ शकटयोगवस्थितैः शुभैर्विहगवस्थितैरशुभैश्च
वज्रयोगः। अयमर्थः। लग्नसप्तमयोः सौम्याः चतुर्थदशमयोश्च पापाः। नान्यत्र केचित्तदा वज्रयोगः। त-
द्विपरीतैर्यव इति। लग्नसप्तमयोः पापाः चतुर्थदशमयोः सौम्यास्तदा यवयोगः। मिश्रैः कमलमिति॥
शुभाः पापाश्च मिश्राः संतश्चतुःकेंद्रगास्तदा पद्मयोगः। तदेव कमलं केंद्रबाह्यगैर्वापीयोगः। स द्वि-
विधः॥ पणफरस्थैः सर्वैरेकः। आपोक्लिमगैर्द्वितीयः॥५॥ वज्रयवयोरसंभवमनुष्टुभाह॥ पूर्वेति॥
वज्रयवौ मयवनाद्यैरुक्तौ चान्ययोक्तौ नायतो रवेश्चतुर्थराशिगौ पूर्वं पश्चाद्वा बुधशुक्रौ न भवत ए-
व। बहुवचनमन्येषामीदृशानामुपलक्षणं॥६ अथ यूपेषुशक्तिदंडाख्ययोगचतुष्टयमनुष्टुभाह॥ के-

मालायोगे भोगासक्तः ॥ ४ सर्पयोगे नानादुःखभोगी ॥ ११ ॥ अथाश्रययोगानामन्ययोगसाम्ये समाश्रयवैफल्यम
नुष्टुभाह ॥ आश्रयेति ॥ आश्रययोगा रज्ज्वादयोऽन्यैर्वज्रयवाद्यैर्मिश्राः सादृश्यंगताः संतो निःफलाः स्युः । ये सदृ
शास्ते एव फलदाः । यद्यन्यैरमिश्रास्तदा स्वफलदाः ॥ चरराशौ लग्नगते स्थिरद्विस्वभावस्थे द्विस्वभावलग्ने चरस्थि
रगे ऽग्रहैरपि मिश्रत्वमित्यर्थः ॥ १२ ॥ गदादियोगपंचकफलं वसंततिलकेनाह ॥ पश्चेति ॥ गदायोगरतीलः । धनी ।
धनार्जने यत्नशीलश्च । १ शाकटयोगे तद्वृत्तिभुक् शाकटाजीवीत्यर्थः । रोगी । कुत्सितभार्यश्च । २ विहगयोगे दू
त्यकर्ता । भ्रमणशीलः । व   द्धः ॥ ननु दूतेनाप्यटनेन भाव्यं तर्ह्यटनपदं व्यर्थमित्यं । परेष्टयागमागमशीलो दू
तः । स्वेच्छयागमन   भट   मित्यर्थः ॥ ३ शृंगाटकयोगे चिरेण सुखी । वयोंते सुखभागित्यर्थः । चिरकालसुखी
ति कश्चित्तत्रापत्तो नागतिः । नयपं वमधर्मस्थैर्योगः शृंगाटको मतः । वयोंते सुखिनां नत्वमत्र स्यात्स्वादु भाविता
मिति ॥ ४ ॥ हलयोगे तु कृषिकरः ॥ ५ ॥ १३ ॥ वज्रादियोगचतुष्कफलं तेनैवाह ॥ वज्रेति ॥ वज्रयोगे बाल्ये वार्द्ध
के च सुखी यौवने दुःखीत्यर्थः । जनप्रियः । शूरश्च । ६ यवयोगे पराक्रमी । यौवने सुखी । अतमध्यं । ७ पद्म
योगे प्रसिद्धकीर्तिः । अपरिमितसुखं गुणाश्च विद्याश्च यादृशो यस्य सः ॥ ८ वापीयोगे स्वल्पं चिरकालीनं च सुख

दशादिपंचमांतेषु सर्वैः समुः।१ द्वादशादिषष्ठांतेषु सर्वैरघ महति॥८॥ योगद्वयमाह॥ एकांतरेति॥ द्वि
तीयस्थानादेकांतरं षट्सु गृहाश्रितैः समुद्रयोगः। लग्नादेवं चक्रं नयत्या॥ द्वितीयचतुर्थषष्ठाष्टमदशम
द्वादशेषु पदास्सर्वैस्तदा समुद्रयोगः।१। लग्नतृतीयपंचमसप्तमनवमैकादशेषु पदास्सर्वैस्तदा चक्रयोगः।
२ एवमाकृतिजा विंशतियोगा उक्ताः॥९॥ संख्यायोगानष्टानाह संख्येति॥ सप्तभिर्ग्रहैः स
प्तादिस्थानेषु गतैरेकैकापगमाद्द्व्यक्तवयादयः सप्तयोगाः स्युः। तद्यथा॥ द्वितीयचतुर्थषष्ठाष्टमदश
मद्वादशेषु पदास्सर्वैस्तदा समुद्रयोगः।१ लग्नतृतीयपंचमसप्तस्थानेषु सर्वैर्वल्लकीयोगः।१ षट्सु
सर्वैर्दामियोगः।२ पंचसु पाशः।३ चतुर्षु केदारः॥४ त्रिषु शूलः।५ द्वयोर्युगः।६ एकस्मिन्गोलः।७ परंतु
पूर्वोक्तान्योगांस्त्यक्त्वा। पूर्वोक्तयोगैः संख्यायोगस्तादृशे पूर्वोक्तयोग एव स्यात्। न संख्यायोगः इत्यर्थः॥१०॥
अथाश्रययोगत्रयजातानां दलयोगद्वयजातानां च फलं वसंततिलकेनाह॥ ईर्ष्युरिति॥ रज्जुयोगे जातः पर
द्रिमसरः। परदेशव्यसनी। सततमटनशीलः स्यात्॥१ मुशलयोगजस्तु गर्वितः। वित्तवान्राजबहुकर्मारं
भशीलः।२॥ नलयोगे जातो हीनः।६ ८ निष्ठुपः। धनवान्। कार्येषु सुदक्षः। दलयोगफलमाहस्रगिति॥

पिभत्यावंधवश्चासप्याज्ञाकराः॥३ केदारयोगे कर्षताकरः। बहूनामुपकारी।४ शूलयोगे युद्धप्रियः। प्रहारयु
तः। अर्थप्रियः। दरिद्रश्च॥४॥१८॥ युगगोलयोः फलं नाभसयोगानां सर्वदशास्वपि फलदाश्चैव हरितपाह॥
धनविरहितेति॥ युगयोगे निर्द्धनो वेदमार्गव्यपेतश्च॥६ गोलयोगे निर्द्धनः। मलिनांगो मलिनवस्त्रः। मूर्खः। लोप
निंद्यशिल्पकर्त्ता किमपि दुः। अमात्यशीलः। नष्टजसोऽटनश्चेति विरुद्धं उच्यते। यद्यपि स्वरूपेतान्नसस्त्रा
घापि भोजनस्याटनं विनासंपादयितुमशक्तोऽटनः॥७॥ एवं फलैः साद्धं नाभसयोगाः कथ्यास्तेसर्वग्रहाताः दशा
सुखकीयफलं ददति। नेयोगा दशाष्टकवर्गफलहंतारो न भवंति। दशापति दशाफलं ददाति। गोचरे वाष्टक
वर्गोक्तं वीनन्वे व नाभसस्य विरुद्धे दशापतेश्चाशुभफलेव तद्वैपरीत्येवा वित्तो इति वेत्र। भोगिनोऽप्याधि
भिरभिभूयते। भैक्षिणो दिशी नलङ्घमच्छायाश्रिताः सुखिनमात्मानं मन्यंतर इति मिश्रफलानुभवो भो
गीनां दरिद्राणां वसंभवत्येव॥ षष्ठवनप्रते साङ्द्वैशतं नाभसयोगानुक्तास्ते कथ्यंते॥ लग्नचतुर्थयोः स
र्वैर्गदा।१ तुर्यास्तयोः सर्वैः शंखः। रसधाम दशमयोः सर्वैर्विभ्रः। दशमलग्नयोः सर्वैर्ध्वजः।४ शंखवभु राम
ध्वजैः सहपूर्वोक्ता स्त्रयोविंशतिः। सप्तविंशत्युत्तरांशतेसंख्यायोगा व प्याए एकविकल्पाः सप्त। द्विविकल्पा ९३

परस्परः॥ भूमौ धनस्थापनशीलः। कदर्यश्च॥ ८॥ १४॥ यूपादिचतुष्कफलमाह॥ त्यागीति॥ यूपयोगे दा
ता। अप्रमादी। श्रेष्ठयज्ञकर्त्ता॥ शरयोगे वधशीलः। बंधनागाराधिकारी। बात्तकर्त्ता वा॥ ११॥ श
क्तियोगेऽनुचितकारी। कर्मस्थिरपटुः। दुःखी निर्द्धनश्च॥ १२॥ दंडयोगे पुत्रादिहीनः। नीचवत्प्रेष्यसेव
याजीवतीत्यर्थः॥ १३॥ १५॥ नावादिचतुष्कफलमाह॥ कीर्त्येति॥ नौयोगे कीर्त्तिमान् कदाचित्सुखी
। अदाता वा॥ १४ कूटयोगेऽनृतेप्सु बलामति परस्परः। मिथ्याभाषीत्यर्थः। कारागाराधिकारी वा। १५ छ
त्रयोगे बंधूनां सुखकरः। वार्द्धके सुखी च॥ १६ चापयोगे युद्धप्रियः। बाल्यवार्द्धकयोः सुखी च॥ १७॥ १६॥
अर्द्धचन्द्रादिचतुष्कफलमाह॥ अर्द्धेंदुजइति॥ अर्द्धचंद्रयोगे सर्वजनप्रियः। दर्शनीयः। सर्वजनपूज्यश्च॥ १८॥
समुद्रयोगे राजतुल्यः। भोगवांश्च॥ १९ चक्रयोगे नृपतिवितश्चक्रवर्तीत्यर्थः। तपोज्ञानादियोगा
त्पूज्यो वा॥ २० एवमाकृतियोगफलमुक्त्वा संख्यायोगफलमाहावीत्तेति। वीत्तायोगे सूक्ष्मदृष्टिः।
गीतप्रियो नृत्यप्रियश्च॥ १॥ १७॥ दामन्यादियोगचतुष्कफलमाह॥ दातेति॥ दामयोगे उदारः। परोपका
रनिरतः। पशूनां पालकश्च॥ २ पाशयोगे धनार्जने विशीलः। असन्मार्गेण धनार्जकरइत्यर्थः। तथा

विभक्ता बंधवश्चास्यान्नाकराः॥३ केदारयोगे कर्षलाकरः। बहूनामुपकारी।४ शूलयोगे पुत्रप्रियः। प्रहारयु
तः। अर्थप्रियः। दरिद्रश्च॥५॥२८॥ युगगोलयोः फलं नाभसयोगानां सर्वदशास्वपि फलदं चैव हरितपाह॥
धनविरहितेति॥ युगयोगे निर्द्धनो वेदमार्गव्यपेतश्च॥६ गोलयोगे निर्द्धनः। मलिनांगो मलिनवस्त्रः। मूर्खः। लोप
निंद्यशिल्पकर्त्ता किमपि दुः। भ्रमणशीलः। नश्च नसो ऽटनश्चेति विरुद्धं उच्यते। यद्यपि स्वरूपेता नसक्तापि
पापि भोजनस्याटनं विनासंपादयितुमशक्तोऽटनः॥७॥ एवं फलैः साद्धैर्नाभसयोगाः क्रान्तास्ते सर्वग्रहातां दशा
सु स्वकीयफलं ददति। ये योगा दशाष्टकवर्गफलहंतारो न भवंति। दशापति दशाफलं ददाति। गोचराष्टक
वर्गोच्छ्वीनत्वेव नाभसस्य विरुद्धे दशापतेश्चाशुभफलेव तद्विपरीत्येवा विरोधदृतिवेन्त्र। भोगिनो ऽप्याधि
भिरभिभूयंते। मैथिनो विशीर्णलद्रुमछायाश्रिताः सुखिनमात्मानं मन्यंतरति मिश्रफलानुभवो भो
गिनां दरिद्राणां वसंभवत्येव॥ यद्येवं नाम ते सार्द्धशतं नाभसयोगान्तुक्रान्तास्ते कथ्यंते॥ लग्नचतुर्थयोः स
र्वैर्गदा।१ तुर्यास्तयोः सर्वैः शंखः। रसधर्मदशमयोः सर्वैर्विभ्रुः। दशमलग्नयोः सर्वैर्ध्वजः।४ शंखविभ्रु राम
ध्वजैः सहपूर्वोक्तास्त्रयो विंशतिः। सप्तविंशत्युत्तरंशते संख्यायोगा यथाए कवि कन्याः सप्ताद्विविकल्पा ९३

स्पांशे वा संस्थितो दिवसे शशी। गुरुणा दृश्यते तत्र जातो वित्तसुखान्वितः। निशि एवं भृगुणा दृष्टः शशी जन्मनि श
स्पतेर्विपर्यये स्थिते शीतांशौ ज्ञापतेः ल्पधनो नर इति॥१॥ अधियोगस्य फलं वसंततिलकेनाह। सौम्यै
रिति॥ चंद्रात्सप्तमषष्ठाष्टमगैर्बुधगुरुशुक्रैरधियोगः एषां एकस्मिन्वा स्थाने स्थितैरपि तदुक्तं। निध
नं द्यूनं षष्ठं चंद्रस्थानाद्यदा शुभग्रहैर्युक्तं। अधियोगः सम्प्रोक्तो बामनतंतः सम्पधापूर्वैरिति। व्यासकृतो वि
स्तारेण सपद्यधाकृतत्रत्यपद्यःतद्यथा। वक्ष्ये सर्वस्मिन्मेरेकः। १सप्तमे द्वितीयः।२ अष्टमे तृतीयः।३ ष
ष्ठसप्तमे चतुर्थः।४ षष्ठाष्टमे पंचमः।५ सप्तमाष्टमे षष्ठः।६ षष्ठसप्तमाष्टमेः सप्तम इति ७ अपद्वि
स्थितैः पापैः पापयोगः। मिश्रैर्मिश्रः। तदुक्तं॥ षट्सप्ताष्टमसंस्थैश्चंद्रात्सौम्यैः शुभोऽधियोगोऽयं॥ पापैः
पापैरेवं मिश्रैर्मिश्रस्तथैवोक्त इति॥ अधियोगफलमाह। तस्मिन्निति। अधियोगजो सेनापतिर्मंत्री भू
पो वा स्यात्। एतत्फलानां युगपदसंभवादेवं ज्ञेयं। उक्तं च वीर्येः सौम्यैर्नृपः। मध्यबलैर्मंत्री। हीनबलैः
सेनापतिरिति॥ नृपादीनाममृतमाऽप्रतीदृशा भवंति। बहुसुखाः। बहुश्लेष्मपाः। नष्टारयः। चिरजीविनः। नी राम
रोगाः। निर्भयाश्चेति। अन्यैरपं तत्र योग एवोक्तः। तदुक्तं। द्यूनं षष्ठमथाष्टमं शिशिरगोः प्राप्ताः समस्ताः शुभाः ९८

एकविंशतिः। त्रिविकल्पाः पंचत्रिंशत्। चतुर्विकल्पाः पंचात्रिंशता। पंचविकल्पा एकविंशतिः। षड्विकल्पाः
सप्त। सप्तविकल्प एकः। एषामैक्ये सप्तविंशत्यधिकं शतं।१२। पूर्वोक्तित्रयोविंशत्या सहसा द्विशतंराशि
द्वादशकेना द्वादशशता निभवंति॥ तदुत्पत्तिप्रकारो गत्तितशास्त्रात् तज्ज्ञेयो विस्तरभियानोच्यते।१९।
इतिमहीधरकृते जातकविवृतौ नाभसयोगाध्यायो द्वादशः॥ १२॥ ॥श्रीरहरिगतो शाध्यानमः॥ ॥
अथ चंद्रयोगाध्यायः। तत्रादौ सूर्यार्किंदुपलापलाध्योक्तिः। मगे चंद्रे फलं मानिन्यात्॥ अधमेति॥ वि
नयः सुशीलता। वित्तं धनं। ज्ञानं शास्त्रबोधः। धीर्बुद्धिः। नैपुणं कार्येषु सत्त्वम् दक्षिर्ष्य। अवत्तिके चंद्र
गे चंद्रे विनयादीन्यधमानि। असमाप्यालि नमवंतीत्यर्थः। रवेः पणफरगे चंद्रे तानि मध्यानि स्वल्पा
निकाहाविकानीत्यर्थः। रवेरापोक्लिमगे चंद्रे तान्युत्कृष्टानि। तदुक्तं। मूर्खो नद्दरिद्रो ह्यल्पलाभ्येषी
त्तौ ध्रुवः प्रसूतेः केचंतुष्टयस्थः। कृपाधितीये धनिनां प्रसूतिमापोक्लिमस्थे चतुरनागरतानामिति॥
अहनीति॥ दिवाजन्मनि यत्र तत्र स्थोधेऽपि यदि स्वनवांशस्थोऽधिमित्रनवांशस्थो वा गुरुणा दृष्ट
श्चेत्तदा धनी भोगी चंद्रः। रात्रौ जन्मनि तादृशः शुक्रदृष्टश्चेत्तदा धनी भोगी वा। तदुक्तं। स्वांशेऽधिमित्र

वदंति। यथा। यत्र तत्र राशेर्यद्राशिसंबंधि निजनवांशे चंद्रस्तस्मात् राशेर्द्वितीयराशौ ताराग्रहे सुनफा। चंद्रन-
वांशराशेर्द्वादशगे ताराग्रहेऽनफा चंद्रनवांशराशेर्द्वितीयद्वादशगे ताराग्रहे दुरधरा। चंद्रनवांशराशेर्द्विद्वा-
दशौ यदाभूत्तोतदा केमद्रुमः। तथा च जीवशर्मा॥ यद्राशिसंज्ञे शीतांशुर्नवांशे जन्मनि स्थितः। तद्द्विती-
यस्थितैर्योगैः सुनफाख्यः प्रकीर्तितः। द्वादशे रनफा ज्ञेयो ग्रहे द्विद्वादशस्थितैः। प्रोक्तो दुरुधरा योगोऽन्यथा
केमद्रुमः स्मृत इति। तन्मतमां यमाहाउ क्रीति। येषामेवं विधं मतं तद्दूषयं केद्र चेन्नवांशचेन्नवायोगत्रयो-
क्तिस्ते लोके न प्रसिद्धा वृद्धैर्नंगीकृत चात॥३॥ सुनफादीनां संख्यागमसूत्रं यथाह। त्रिंशदिति॥ एकत्रिंश
सुनफायोगाः। तावंत एवानफाः॥ अशीत्युत्तरं शतं दुरधराभेदाः। इच्छाविकल्पैः परिपाट्या भिनीयसंख्या
यनीते सति निवृत्तिः कार्या। पुनर्भूयोऽपनीतिः स्थानांतरे चालनं कार्यं॥ अथ प्रथमं॥ सुनफादयो भौमबु-
धगुरुसितासितैः पंचभिर्निः पाद्यते। तस्मादिच्छाविकल्पाः पंच॥ तेषां न्यासः।

५	४	३	२	१
१	२	३	४	५

तत्र
लीलावत्यां भास्करोक्तविधिना विकल्पसंख्यानयनं। तदुक्तं तेनाएकाद्येकोत्तराअंक काव्य राम
स्तामान्याः क्रमस्थितैः। परः पूर्वेण संगुणस्तत्परस्तेन तेन च। एकद्वित्र्यादिभेदाः स्युरिदं साधारणं १५

क्रूराणां यदि गोचरेण पतिता भाग्यालयाद्दूरतः।भूपाजः प्रभवेत्स सप्तजलधेर्वेलावनांतो मदवैः सेना-
मत्तकरींद्रदानसलिलं भृंगैर्मुहुः पीयते इति॥२॥ सुनफानफादुरधराकेमद्रुमाख्यं योगचतुष्क-
शार्दूलविक्रीडितेनाह।हित्वेति॥ रविं विना चंद्रात् द्वितीयगैर्ग्रहैः सुनफा योगः।द्वादशैरनफायोगः।
द्विद्वादशगैर्दुरधरा योगः। रविर्योगभंगहेतुर्ना। परं योगकर्त्ता केमध्ये न गात्पदृत्यर्थः।एतद्योगत्रयाभा-
वे केमद्रुमयोगः।एते योगाः सर्वसंमताः।केचित्तु आचार्या लग्नात जो मा द्वियहे भौमादिग्रहयुते वा चं-
द्रे केमद्रुममंगलव्यतीतावंद्रादपि केंद्रगे ग्रहे केमद्रुमाभावः।तदुक्तं।व्ययपार्श्वक्द्रगाश्चंद्राद्विना भानु-
नवेंद्रग्रहैः।कश्चित्स्याद्या विनायं इंलाना केंद्रगनो।यवा।योगःकेमद्रुमो नाम तदास्यादिति गर्हितः।
भवंति निंदिता वाराद्यतिरिक्ता मपसंपुनारति॥ मतांतरमाह॥केचिदिति॥ केचित्तवार्याः केंद्रेषु के-
चित्रवांशेषु योगत्रयं वदंति॥तद्यथा।ताराग्रहैश्चंद्राद्ब्रह्मतुर्यभेः सुनफा दशमस्थैरनफा। चतुर्थ-
दशमस्थैर्दुरधरा अतोऽन्यथा केमद्रुमः।तत्पाचभूतकीर्तिः। चंद्रचतुर्थस्थैः सुनफा दशमस्थैः की-
र्तितोऽनफा विहगैः।उभयस्थितैर्दुरधरा केमद्रुममसंति तोऽतोऽन्यदिति।केचित्तवांशकेषु योगत्रयं

भृगुशनयः ॥२८ कुजगुरुभृगुशनयः ॥२९ बुधगुरुभृगुशनयः ॥३० एवं यत्तु विकल्पाः पंच ॥ कुजबुध
गुरुभृगुशनिभिः पंचविकल्पएकः ॥३१ एवमेकत्रिंशत्सुनफायोगाः ॥ अनेनैव विधिनावंद्रान्द्वादशा
स्थेरनफायोगा एकत्रिंशत् ॥ अथ दुरुधरायोगविकल्पाः ॥ तत्र प्रस्तारभावात्क्रमशोपिनीयते तिन्यायेन बु
त्पत्तिः ॥ एको द्वितीये द्वादशे द्वितीयः ॥ द्वितीये एको द्वितीयो द्वादशे ॥ यथा ॥ भौमबुधौ ।१ बुधभौमौ ।२
कुजगुरू ।३ गुरुकुजौ ।४ कुजभृगू ।५ भृगुकुजौ ।६ कुजशनी ।७ शनिकुजौ ।८ बुधगुरू ।९ गुरुबुधौ ।१०
बुधभृगू ।११ भृगुबुधौ ।१२ बुधशनी ।१३ शनिबुधौ ।१४ गुरुभृगू ।१५ भृगुगुरू ।१६ गुरुशनी ।शनि
गुरू ।१८ भृगुशनी ।१९ शनिभृगू ।२० । अथैको द्वितीये द्वौ द्वादशे । द्वितीये द्वौ द्वादशे वैकः ॥ तद्यथा ॥ कु
जो बुधजीवौ ।१ बुधजीवौ कुजः ।२ कुजो बुधभृगू ।३ बुधभृगू कुजः ।४ कुजो बुधशनी ।५ बुधशनी
कुजः ॥ कुजो गुरुभृगू ।७ गुरुभृगू कुजः ।८ कुजो गुरुशनी ।९ गुरुशनी कुजः ।१० कुजः भृगुशनी ।११ भृगु
शनी कुजः ।१२ बुधः कुजगुरू ।१३ कुजगुरू बुधः ।१४ बुधः कुजभृगू ।१५ कुजभृगू बुधः ।१६ बुधः कु राम
जशनी ।१७ कुजशनी बुधः ।१८ बुधो गुरुभृगू ।१९ गुरुभृगू बुधः ।२० बुधो गुरुशनी ।२१ गुरुशनी बुधः ।२२ ७५

स्मृतमिति॥ एकादिकाएकोत्तरा व्यस्ता ग्रकांकमस्थितैः भक्ताः लब्धैर्गुणिताः संततस्पर्धः। पथा। पंचाना
म ध्यो रूपं छेदः। तेन पंचानां भागमपहृत्याप्तं पंच। ५ तैर्द्वितीयस्थानचतुरः संगुण्याधस्थाप्याद्यांभ्यां भा
गेहृते लब्धं दश। १० तैस्तृतीयस्थानस्थांस्त्रीन् संगुण्याधःस्थैः त्रिभिर्भक्ते लब्धं दश। १० तैश्चतुर्थस्थानस्थौ द्वौ संगु
ण्याधस्थैश्चतुर्भिर्भक्ते लब्धं पंच। ५ तैः पंचमस्थानस्थमेकं संगुण्याधस्थैः पंचभिर्भक्ते लब्धं एकं। १ एवं विक
ल्पाः। ५।१०।१०।५।१ एकादिकान्तेयाः पथा। एकविकल्पाः पंच। द्विकल्पा दश। त्रिविकल्पा दश। चतुर्विकल्पाः पं
च। पंचविकल्प एकः। एवमेकत्रिंशत्सूचनप्रकाराः॥ ते पथा॥ वंशस्तद्वितीये भौमः। बुधः।२ गुरुः।३ भृगुः।
४ शनिः। ५ एवमेकविकल्पाः पंच॥ कुजबुधौ।६ कुजजीवौ।७ कुजभृगू।८ कुजशनी।९ बुधगुरू।१० बुधभृ
गू।११ बुधशनी।१२ गुरुभृगू।१३ गुरुशनी।१४ भृगुशनी।१५ एवं द्विविकल्पा दश॥ अथ त्रिविकल्पाः॥
कुजबुधजीवाः।१६ कुजबुधभृगवः।१७ कुजबुधशनयः।१८ कुजगुरुभृगवः।१९ कुजगुरुशनयः।२० कु
जभृगुशनयः।२१ बुधगुरुभृगवः।२२ बुधगुरुशनयः॥२३ बुधभृगुशनयः।२४ गुरुभृगुशनयः।
२५ एवं त्रिविकल्पा दश॥ अथ चतुर्विकल्पाः॥ कुजबुधगुरुभृगवः।२६ कुजबुधगुरुशनयः॥२७ कुजबु

जगुरुशुक्राः ॥ ९ कुजगुरुशुक्रा बुधः ॥ १० बुधः कुजगुरुशनयः ॥ ११ कुजगुरुशनयो बुधः ॥ १२ बुधः
कुजशुक्रशनयः ॥ १३ ॥ कुजशुक्रशनयो बुधः ॥ १४ बुधो गुरुशुक्रशनयः ॥ १५ गुरुशुक्रशनयो बुधः ॥
१६ गुरुः कुजबुधशुक्राः ॥ १७ कुजबुधशुक्रा गुरुः ॥ १८ गुरुः कुजबुधशनयः ॥ १९ कुजबुधशनयो गु
रुः ॥ २० ॥ एवमेकत्र विंशत्युत्तरं शतं ॥ १२० ॥ अथ द्वितीये एकः ॥ द्वादशे वचारः ॥ वचारो द्वितीये द्वा
दशे वेकः ॥ तद्यथा ॥ कुजो बुधगुरुशुक्रशनयः ॥ १ बुधगुरुशुक्रशनयः कुजः ॥ २ बुधः कुज
गुरुशुक्रशनयः ॥ ३ कुजगुरुशुक्रशनयो बुधः ॥ ४ गुरुः कुजबुधशुक्रशनयः ॥ ५ कुजबुधशुक्रश
नयो गुरुः ॥ ६ शुक्रः कुजबुधगुरुशनयः ॥ ७ कुजबुधगुरुशनयः शुक्रः ॥ ८ शनिः कुजबुधगुरु
शुक्राः ॥ ९ कुजबुधगुरुशुक्राः शनिः ॥ १० एवं त्रिंशदुत्तरं शतं ॥ १३० ॥ गुरुः कुजशुक्रशनयः ॥ २१
कुजशुक्रशनयो गुरुः ॥ २२ गुरुर्बुधशुक्रशनयः ॥ २३ बुधशुक्रशनयो गुरुः ॥ २४ शुक्रः कुजबु
धगुरु ॥ २५ कुजबुधगुरवः शुक्राः ॥ २६ शुक्रः कुजबुधशनयः ॥ २७ कुजबुधशनयः शुक्रः ॥ २८ शुक्रः
कुजगुरुशनयः ॥ २९ कुजगुरुशनयः शुक्रः ॥ ३० शुक्रो बुधगुरुशनयः ॥ ३१ बुधगुरुशनयः शुक्रः ॥ राम

बुधः भृगुशनी।२३ भृगुशनी बुधः।२४ गुरुः कुजबुधौ।२५ कुजबुधौ गुरुः।२६ गुरुः कुजभृगू।२७ कु
जभृगू गुरुः।।२८ गुरुः कुजशनी।२९ कुजशनी गुरुः।३० गुरुर्बुधभृगू।३१ बुधभृगू गुरुः।३२ गुरु
र्बुधशनी।३३ बुधशनी गुरुः।३४ गुरुः भृगुशनी।३५ भृगुशनी गुरुः।३६ भृगुः कुजबुधौ।३७
कुजबुधौ भृगुः।३८ भृगुः कुजगुरू।३९ कुजगुरू भृगुः।।४० भृगुः कुजशनी।४१ कुजशनी भृगुः।
४२ भृगुर्बुधगुरू।४३ बुधगुरू भृगुः।।४४ भृगुर्बुधशनी।४५ बुधशनी भृगुः।४६ भृगुर्गुरुशनी
।४७ गुरुशनी भृगुः।।४८ शनिः कुजबुधौ।४९ कुजबुधौ शनिः।५० शनिः कुजगुरू।५१ कुजगुरू
शनिः।५२ शनिः कुजभृगू।५३ कुजभृगू शनिः।।५४ शनिर्बुधगुरू।५५ बुधगुरू शनिः।५६ श
निर्बुधभृगू।५७ बुधभृगू शनिः।।५८ शनिर्गुरुभृगू।५९ गुरुभृगू शनिः।६० एवमेकत्रनी
ता अशीतिः।।८०।।अथैको द्वितीयो द्वादशोऽत्र पः द्वितीयेऽत्र पः।एको द्वादशो।।तद्यथा।कुजो बु
धगुरुभृगवः।।१ बुधगुरुभृगवः कुजः।२ कुजो बुधगुरुशनयः।३ बुधगुरुशनयः कुजः।४ कुजो बु
धभृगुशनयः।५ बुधभृगुशनयः कुजः।६ कुजो गुरुभृगुशनयः।भृगुशनयः कुजः।८ बुधः कु

वशनयः कुजशुक्रौ ॥६ कुजशनीबुधगुरुशुक्राः ॥७ बुधगुरुशुक्राः कुजशनी ॥८ बुधगुरू कुजशु-
क्रशनयः ॥९ कुजशुक्रशनयो बुधगुरू ॥१० बुधशुक्रौ कुजगुरू शनयः ॥११ कुजगुरुशनयो
बुधशुक्रौ ॥१२ बुधशनी कुजगुरुशुक्राः ॥१३ कुजगुरुशुक्रा बुधशनी ॥१४ गुरुशुक्रौ कुज-
बुधशनयः ॥१५ कुजबुधशनयो गुरुशुक्रौ ॥१६ गुरुशनी कुजबुधशुक्राः ॥१७ कुजबुधशु-
क्रा गुरुशनी ॥१८ शुक्रशनी बुधगुरुकुजाः ॥१९ कुजबुधगुरवः शुक्रशनी ॥२० ॥ एवमेकत्रा-
शीत्युत्तरंशतं १८० दुरधरायोगाः ॥ ४ ॥ सुनफानफयोः फलं मालिन्याह ॥ स्वयमिति ॥ स्वो-
पार्जितधनः । नृपस्तत्तुल्योवा ॥ बुद्धिवित्तकीर्तिभिर्युक्तः । ईदृशः सुनफायोगजो भवति । अ-
प्रतिहताज्ञः । नीरोगदेहः । विनयादिगुणायुतः । प्रथितयशाः । शब्दादिविषयेषु सुखयुतः ।
अनुलेपालंकाराद्यैरम्यवेषः । निर्वृत्तो मनोदुःखहीनः । ईदृगनफाजो नरः ॥५ ॥ दुरधराकेमद्रु-
मयोः फलं वसंततिलकेनाह ॥ उत्पन्नेति ॥ यत्र तत्रोत्पन्नो भोगैः सुखयुतः । धनैरश्वादिभिरनेकै-

राम
१८

23

३२ शनिः कुज बुध गुरवः ॥ ३३ कुज बुध गुरवः शनिः ॥ ३४ शनि कुज बुध भृगवः ॥ ३५ कुज बुध भृगवः
शनिः ॥ ३६ शनिः कुज गुरु भृगवः ॥ ३७ कुज गुरु भृगवः शनिः ॥ ३८ शनि बुध गुरु भृगवः ॥ ३९ बुध गु
रु भृगवः शनिः ॥ ४० ॥ पूर्ववत्रेसप्तपं । को विक्रान्तंक्ति वक्तुं स्पष्टमत्र बोधये । जबुधौ २ कुज बुधौ । गुरु श
नी ३ गुरु शनी । कुज बुधौ । ४ कुज बुधौ । भृगु शनी । ५ भृगु शनी कुज बुधौ ॥ ६ कुज गुरु भृगु बुधौ । ७
भृगु बुधौ कुज गुरू ॥ ८ कुज गुरू बुध शनी । ९ बुध शनी कुज गुरू ॥ १० कुज गुरू भृगु शनी ॥ ११ भृगु श
नी कुज गुरू ॥ १२ कुज भृगू बुध गुरू ॥ १३ बुध गुरू कुज भृगू ॥ १४ कुज भृगू बुध शनी । १५ बुध शनी
कुज भृगू । १६ कुज भृगू गुरु शनी । १७ गुरु शनी कुज भृगू ॥ १८ बुध गुरू कुज शनी । १९ कुज शनी बु
ध गुरू भृगु शनी । २५ भृगु शनी बुध गुरू ॥ २६ बुध भृगू कुज शनी । २७ कुज शनी बुध भृगू ॥ २८ गु
रु भृगू बुध शनी ॥ २९ बुध शनी गुरु भृगू ॥ ३० ॥ एवमेकत्रपक्षभुत्रोशतं ॥ १६ ॥ अथ त्रयो द्विनीयो त्र
यो द्वादशो त्रयो द्विनीये । द्वौ द्वादशे ॥ तद्यथा ॥ कुज बुधौ गुरु भृगु शनयः ॥ १ गुरु भृगु शनयः कुज बु
धौ । २ कुज जीवौ बुध भृगु शनयः ॥ ३ बुध भृगु शनयः कुज जीवौ ॥ ४ कुज भृगू बुध जीव ध शनयः ॥ ५ बुध जी

दः। अन्यथा प्रकारांतरेणान्यत विपरीतं व्यत्ययं। वाच्यं। अयमर्थः। रात्रौ जन्मन्यदृश्यचक्रार्द्धे चंद्रोऽध
मः। दृश्यचक्रार्द्धगतः शुभ इति॥२५॥ लग्नाच्चंद्राद्वोपचयगानां सौम्यानां फलं वसंततिलकेनाह॥ लग्ना
दिति। उपचयजन्मनि लग्नाद्वुपचयस्थो बुधगुरुसितास्त्रयोपि स्युः। सोत्यंतं धनी। चंद्रादुपचयगैस्तै
र्धनी। लग्नाच्चंद्राद्द्वाद्वावुपचयगौ। तदा समो मध्यमधनः। नातिबहुधनो नात्यल्पधन इत्यर्थः। तद्द
न तयो लग्नाच्चंद्राद्वैकस्मिन्नुपचयगोऽल्पधनी। किंचिद्धनवानित्यर्थः। अर्थादेव लग्नाच्चंद्राद्वोप
चयेयोग्यहीने निर्धनः। अन्येषु शुभमात्रफलेषु विद्यमानेष्वपीदं बाहुल्येन वाच्यं। अप्र र्धवि
पमर्थः। लग्नाच्चंद्राद्वोपचयगाः सौम्याः केमद्रुमाद्यशुभफलमप्यभिभूय शुभमेव प्राधान्येन
दद्युरिति॥२६॥ श्रीः॥ इति पत्तीश्वरकृते जातकविवरणे चंद्रयोगाध्यायः षष्ठोपदेशः॥१३॥ श्रीनरसीहाय
नमोनमः॥ श्रीः॥ अथ द्विग्रहयोगाध्यायः॥ तत्र रवेश्चंद्रादियुक्तस्य फलं शार्दूलविक्रीडितेनाह। तिग्मांशुरिति॥ रवि
श्चंद्रयुतो यंत्राश्मपाषाणानां क्रियासु कुशलो नरो भवति। कुजयुतः पापिनां २ बुधेन युतः क्रियासु कुशलो

राम
२८

पुक्रः। दाता। समीचीनसेवकः। ईदृग्गुरुधराजः स्यात्॥ मलिनवासाः॥३॥ दुःखी। स्वकुलानुचितक
र्मत्तरा। निर्द्धन। परकर्मरतः। दुष्टस्वभावः। नपकेमद्रुमे ईदृशः स्यात्॥ ४॥ सुनफादीनां सा
मान्यफलमुक्त्वा ग्रहवशाद्विशेषफलमाह॥ उत्साहेति॥ उद्योगशीलः। रताप्रियः। धनी। अ
समीति तत्कारी। कुजे चैव योगकर्त्तरीदृग्भवति॥ हृष्टः। शोभनवाक्। आनतः। विचित्रपुस्तकलिपिषु
कुशलः। बुधे योगकर्त्तरीदृक्॥ २ धनी। धर्मी। सुखी। राजमान्यः। गुरौ योगकर्त्तरीदृक्। ३ स्त्री
लोलः। प्रभूतार्थः। इन्द्रियार्थोपभोगशीलः। भृगौ योगकर्त्तरीदृक्॥ ४॥ ७॥ शनैश्चरे योगक
र्त्तरि चंद्रे दृग्रूपाद्दृश्ये च जातस्य फलं पृच्छितात्र आह॥ परविभवेति॥ परार्जितानामैश्वर्यरत्नां ग
ह वस्त्रवाहनादिपरिवाराणां भोक्ता। नानाकार्यकर्त्ता। बहूनां स्वामी। ५ शनौ योगकर्त्तरीदृक्। ए
वं ध्वांक्षादिग्रहे योगकर्त्तरि ध्वांक्षादीनां फलं वाच्यं॥ अथ शुभकृदिति॥ चंद्रो दिनेदृश्यमूर्त्तिः सहमादिभाव
षड्गतो। ऽनिष्टकरो दारिद्र्यादिकर्त्ता। गलिततनुरदृश्यशरीरो लग्नादिषड्भावगतः शुभमप्यध्यापदिप्र

वञ्चकः ॥ परस्त्रीसक्तः। कितवः। ईदृशः। भृगुयुते कुजे। ३। दुःखी। मिथ्याप्रतिज्ञाकर्त्ता। निंदितोऽसूया
युतश्च शनियुते कुजे भवति। ता॰ वि॰ ॥ ३ ॥ गुर्वादियुतबुधस्य भृग्वादियुतगुरोश्च फलं शार्दूलेनाह ॥ सौ
म्य इति। रंगचरो मद्राद्रिकः ॥ गानवल्लभः। नर्त्तनकुशलश्च गुरुयुते बुधे। १ वचनकुशलः ॥ सुमे
गतानां नरसंघानां वश्यामी। भृगुयुते बुधे। २ परवंचनदक्षः। लंघको गुरुवचनातिक्रमी च श
नियुते बुधे। सदुःशनिः ॥ ३ शोभनविद्यायुतः। धनकलत्रपुत्रयुतः। विनयादिगुणाढ्यश्च भृगुयुते
गुरौ। १ नापितः कुंभकारो वा सूपकारो वा शनियुते गुरौ। २ ज्ञेयः ॥ ६ ॥ शनियुतभृगुफलं प्रहर्षिण्या च
पुष्पिताग्रयाह ॥ अस्तिनेति ॥ मंदनेत्रः। स्त्रीलाभमान्यचेताश्च धनः। लिपिरत्नविन्यासः। पुस्तले
पकर्म। चित्रमाल्यरच्यः। तेषां ज्ञाता। ईदृशः शनियुते भृगौ भवति। कथितेति। परतोऽद्विकयोगे पि
उक्तफलं कल्प्यं। यथा रवीदुकुजयोगे रवीदुयोगे यत्फलं तत् विकुजयोगे यत्फलं तद्वद्रकुजयोगे च प
त्फलं तत्रयमपि वाच्यं। एवं राशिद्वये द्विग्रहयोगे त्रिग्रहयोगे च सर्वा तत्फलानि वाच्यानीत्यर्थः ॥ ५ ॥
श्रीः। इति महीधरकृते जातकविवरणे द्विग्रहयोगाध्यायः पञ्चदशः ॥ ॥ श्रीनरसिंहात्मजो शाम्भवानमो नमः ॥ २०

बुद्धिपशः सुखयुतं या ३ गुरुयुतो विषमस्थभावं परकर्मकरं वा ४ भृगुयुतो मदनादिक्रियायाख
ज्ञा घा पुधैश्चप्राप्तधनं ५ शनियुतो धात्रुयुता मात्रा द्युत्पत्तिक्रियासु गैरिकादिषु व पवीतो भांडप्र
काराः समुद्रकादयस्तेषु कुशलं वा कुरुते ॥१॥ कुजादियुतवेंद्रफलमाह ॥ कूटेति ॥ कूटादीनि पण्या
नि यस्य तं । कूटपण्यं द्रव्यान्तरं प्रतिरूपं क्रियया विक्रयशीलं । नार्याः प्रसूस्यकुंभा नां व विक्रय करं ज
ननीद्रोहकरं च कुजयुतश्चंद्रः कुरुते १ प्रियंवदं कार्यकुशलं जनवल्लभ पपपत्विं नं व बुधयुतश्चंद्रः ॥२
रिपुतो जेतारं वंशप्रधानो वयलांधन ना यं वसुगुरुश्चंद्रः ॥३ वाससां क्रियादो नियुतां तं तु वा
प । आदिपदान्नासी वनरंजन कंपविक्रये च प्रिकुशलं भृगुयुतश्चंद्रः ॥४ व्ये रितीयापतिं हि
या सवत्सा कामतः प्रपेत । अक्षतावततावैव पुनर्भूः संस्कृता पुमांति ति पुनर्भूल तत्वा । तद्युत्रे
शनियुतश्चंद्रः कुरुते ॥५॥ बुधादियुतकुजस्य फलमाधरयाह ॥ मूलादीति ॥ मूलफलपुष्प
व ८ कं लैस्तोला ये: कूटैः कृत्रिमद्रव्ये व्यवहारकरो वा त्तिरित्यनियुतो नियुद्धकुशलश्च बुधयुते
कुजे ॥१ नम्रेऽद्विकृतः । राजा वा लब्धधनो विप्रो वा गुरुयुते कुजे ॥२ गोपालः ब्राहुयोद्ध्र ॥

क्तं।तत्रापिबलिनोमध्येयावंतोऽस्तमितास्तेस्वप्रव्रज्यांसांनददति।किंतुतत्कृतमक्तपस्त्वप्रव्रज्याप्रव्र
जितानांभक्तिभाजोभवंति।अभिधावितेति।बलिभिर्निहितेर्यहपुद्धेऽन्यग्रहाजितैरन्यग्रहद्धेष्ठा
भिधावितमात्रेत्यादीजिताः।दीक्षाप्रार्थनपरानतुदीक्षांप्राप्नुवंतीत्यर्थः।ननुपराजितैःपूर्वंप्रव्रज्याप्र
स्तुतिरुक्ता।अत्रपुनःप्रव्रज्याप्रार्थनमुच्यतइतिविरोधः।उच्यते।बलीयहोग्रहयुद्धेऽन्येनजितःसन्
त्र्केनापिदृष्टस्तेतदाप्रव्रज्यांगृहीत्वाप्यजति।यदाजितोप्यन्येनदृष्टस्तेतदाप्रव्रज्यामर्थयमानोपिना
प्नोतीति।सावप्रव्रज्याबलिनोऽस्तंगतस्यास्तादुक्तं।दीक्षादानसमर्थोभवतियदाबलीनसंपूर्णः।
तस्यैवदशाकालेदीक्षांलभतेनरोऽवश्यमिति॥२॥चतुरादिभिरेकस्थैर्विनापिप्रव्रज्यायोगंशालि
न्याहां।जन्मेशइति॥नरजन्मकालेयद्राशौवेदस्तद्राशीशोजन्मेशः।सपरान्यैरदृष्टःशनिंपश्य
तितदाप्रव्रज्यायोगः।सवशनिजन्मेशयोर्योबलीतस्यंवधीतद्दशायांवातदुक्तं।जातकाम्रेऽपिनरव
इकोत्तांजन्मसत्वाहोगृहेहिअतोदिष्टौ॥तस्मत्र्यादिरवादारांबलिनदसांहोदृत्तक्वार्जास्पार्थीय राम
स्यप्रेक्षतेशनिंजन्मपतिर्ग्रहैरदृष्टः।तस्यदीक्षादानंबलिनोदशाभवतितत्कालमिति॥अकिंचिति ८१

अथप्रव्रज्यायोगाध्यायः॥ तत्रादौ चतुरादिग्रहैरेकस्थैः प्रव्रज्याः शार्दूलविक्रीडितेनाह॥ एकस्थैरि
ति॥ यत्र तत्र राशौ चत्वारः पंच षट् सप्त वा एकस्था यदा ग्रहाः सर्वे चेद्बलहीनास्तदा प्रव्रज्या न भव
ति। चतुरादीनामेकगानां मध्याद्येकोऽपि बली। नष्टे च प्रव्रज्याप्रदा बहवो बलिनस्तदा बह्व्यः
प्रव्रज्याः स्युः। एवमेकस्थैश्चतुरादिभिर्बलिभिः प्रव्रज्यायोगाः। ताश्च यथाक्रमं बलयुतैर्माहेयादिभिः
शाक्यादयः क्रमात्स्युः। अयमर्थः। चतुरादीनामेकस्थानां मध्यात्कुजे बलवति शाक्यो रक्तपटो
बौद्धो वा।१ बुधे सबले आजीवक एकदंडी।२ गुरौ सबले भिक्षुस्त्रिदंडी।३ चंद्रे सबले वृद्ध
श्रावकः कापालिक इत्यर्थः।४ वक्त्रभंगभयात् श्रावकपदलोपः। शुक्रे सबले चरकः। चक्रध
रः।५ शनौ सबले निर्ग्रन्थः क्षपणकः।६ रवौ सबले वन्याशनो मूलफलाशनस्तपस्वी।७ एवं वृत्तनव
रुद्रतुल्या प्रव्रज्या ज्ञेया॥ बहुषु बलवत्सु बलाधिक्यक्रमेणापरत्र निर्देशः इति॥ शाक्यादिप्रव्रज्यास्वा
मिभिर्ग्रहैरस्तमयगतैः पराजितैः प्रव्रज्याच्युतिर्वाच्या। ग्रहोक्ता प्रव्रज्यामादाय पुनस्त्यजतीत्यर्थः॥१॥ अत्रै
व विशेषं वैतालीयेनाह॥ रविलुप्तेति॥ चतुरादीनामेकस्थानां यावंतो बलिनस्तावंतः प्रव्रज्याप्रदाः स्युः

सप्ततितिशीलाध्यायः ॥ ॥ वंदे भुजप्रमानन तत्रशीलं वक्तुं ईशार्पा भितहा एकैकथा कृतद्वप
फलमाह ॥ प्रियभूषणइति ॥ मंडअनवल्लभः ॥ शोभनाकारः ॥ जनप्रियः ॥ कार्यपटुः ॥ बुद्धिमान् ॥ इ
त्याश्विनीजातः ॥ १ ॥ बहुवल्लभं तारकापे तथा ॥ प्रारब्धकर्मता ॥ मतगः ॥ सत्यवादी ॥ चतुरः ॥ कर्मता विप
रीतथ्यसशठः सद्भिर्विष्यतइति ॥ मानीकृतंस्मृकृतंह्वीतिकृतघ्नः ॥ वधपरः ॥ पापनतरई इत्यार्द्रजः ॥ ६ ॥
३ ॥ दांतइति ॥ तपःक्लेशसहः ॥ सुखभाक्ता ॥ शोभनशीलः ॥ नद्रः ॥ व्याधिमान् ॥ तृष्णातः ॥ स्तोकार्थेनसंतुष्टः ॥
इदिकपुनर्वसुजः ॥ ७ ॥ शांतात्मेति ॥ जितेंद्रियः ॥ जनप्रियः ॥ शास्त्रवित् ॥ रावित्तवान् ॥ धर्मरतः ॥ इतिकपुष्यजः ॥ ८
परकार्यविमुखः ॥ सर्वभक्षः ॥ संचयशीलो दीर्घात्रिवल्पापरतः ॥ अनुपत्ततितः ॥ वंचकः ॥ उक्तंवामसुखंपद्म
दलाकारं यातीर्वंदनशीतला ॥ हृदयं कर्तरीसमं त्रिविधं धूर्ततलतामिति ॥ ९ ॥ ५ ५ बहुमत्योति
॥ बहुसेवको बहुधानः ॥ भोगभाक् ॥ देवपितृभक्तिमान् ॥ महोत्साहः ॥ इतिमघाजः ॥ १० ॥ प्रियमामाषी ॥
दानशीलः ॥ कांतिपुतः ॥ श्रमताशीलः ॥ राजसेवारतः ॥ इतिकपूर्वजिः ॥ ११ ॥ ६ ॥ सुभगइति ॥ जनप्रियः ॥
विघपाप्राप्तधनं येन ॥ भोगान्मुतः ॥ सुखी ॥ इत्युत्तराजः ॥ १२ ॥ उघमी ॥ निर्लज्जः ॥ पद्यपः ॥ दयालुः ॥ चोरः ॥ राम ८२

शनिर्बलहीनं जन्मेशं वा पश्यति। तदा शन्युक्तप्रव्रज्या। तदुक्तं। सातत्तिद्दिट्ठे बलहीणो जम्मसत्ता
हिमता हत्तिगांथो॥ अस्यार्थः। शनिदृष्टे बलहीने जन्मनाथे भरता तन्निग्रंथा मिति। दीक्षा मिति।
यत्र तत्र स्थाप्यं इो पदिशन्ति दे: कात्ताशः उजश्यतर नवांशगस्थशनिदृष्टश्चा। तदापि रान्युक्तप्रव्रज्या।
तदुक्तं। कोत्तास्सवि दिक्काणो जइ होइ। ससी तदंसगउं॥ वक्कं सेवा दिट्ठो कोलोत्तासद्य हंभरत्ता विमुक्को॥
अस्यार्थः। कोत्तास्यापि द्रेष्काणो यदि भवति शशी तदंशगतः। वक्रो रो वा दृष्टे कोत्तो नसर्वदर्शनविमु
क्त इति॥३॥ यद्योगे राजापि दीक्षितः स्यात्तद्योगद्वयमाह॥ सुरगुर्वित्ति। गुरुचंद्रजन्मलग्नेषु शनि
दृष्टेषु नवममेव गुरौ राजयोगे पूर्वोक्ते जातस्तीर्थकृत् तथा शास्त्रकर्त्ता दीक्षितः स्यात्। द्वितीयमाह। नवमेति।
अन्यग्रहादृष्टे शनौ नवमेन। यद्योगे जातो राजादीक्षितो भवति। राजयोगाभावेऽन्योपि दीक्षामाप्नोति।
तदुक्तं॥ नवमस्थाने सौरे यदि स्थितः सर्वदर्शनविमुक्तः। नरनाथयोगजातो नृपोपि सन्दीक्षितो भ
वति। नृपयोगस्याभावे योगेऽस्मिन्दीक्षितो नरो जातः निःसंदिग्धं प्रव्रजे द्योगस्यास्य प्रभावेनेति॥
४॥ इति महीधरकृते जातकविवरणे प्रव्रज्याध्यायः पंचदशः॥ ॥ श्री नृसिंहगतिशाभ्यां नमो नमः॥ अथ

दृशस्तुलार्के ॥७ उग्रस्वजनाव: । असमीक्षितकर्त्ता । विषप्रयोगे रतो ऽर्जितं धनं येना शस्त्री गतां तनायांग छ
ति दाम्ल निर्वात्ति इत्यर्थ: । ईदृशो ऽलिगे ऽर्के ॥ ८ सतां पूज्य: । धनी । क्रूरवेष: । वैद्य कर्मनि तु । दोत्पिक
मत्त: । ईदृशो धनुरर्के ॥९ कुलानुचितकर्मकृता मूर्ख: । कुपित वाणिज्यकर्त्ता ॥ स्वल्पवित्त: । लोभी । परभा
ग्यरत: । परान्नोपभोक्ता इत्यर्थ: । ईदृशो मकरगतेऽर्के ॥१०।१६। । कुंभमीनाकीफलं चंद्रार्कयो रेकराशिग
योश्च नक्षत्रज्ञान बवसं त तीति तिलकेनाह ॥ नीच इति ॥ कुलानुचितकारी । पुत्रैर्जनवान्नान्येन व विरहित: । निर्द्ध
न: । ईदृश: कुंभगेऽर्के ॥११ नजो ऽश्मरत्ति मुक्ताफलप्रवालादि । ४ तद्विक्रयेता विमवतो धैर्यं पस्य । प्रीतां
पूज्य: । ईदृशो मीनेऽर्के ॥१२ नक्षत्रमानवोरा ४ तमात्पिन ४ शि पुरुष: कालांगा नीत्यादि नोक्त: । तनुन्ये ऽगावि
भागे वद्धार्कपुत्रे विक्रं वदेता अयमर्थ: । वद्धार्कों पप्रशावेक गोसरापि: कालपुरुषेपत्रागे पठित: । तत्रम
कतिनकादि विलिंदिशेत ॥ यथा मेषस्थ पोर्थ्यं द्वार्कपो: शिरसि । वषस्थयो मुखे इत्यादि ॥११॥ इति रविराशि
शीलं अथ मेषचक्रिकनुमा वस्थ कुजफलमाह नकुरकेना ॥ नरपतीति ॥ राजपूज्य: । भामयोगीन: । सेना
पति: । क्रयविक्रयपटु: । धनी । व्रतीतांग: । तस्कर: । क्षिप्रकीर्तेंद्रिय: । ईदृशो मेषालिगे कुजे । रक्षीणित: । मित्रेषु

क्रूरः।परस्त्रीसक्तः।कपटी।शोभनालंकारः।भयार्त्तः।निःस्नेहः।ईदृशो वृषतुलास्थे कुजे।४।।१८।।मि
थुनकन्याकर्कगकुजफलं वसंततिलकेनाह।। बोधेऽस्ति।।असहनशीलस्तेजस्वी त्यक्तः।पुत्रयु
क्तः।मित्रहीनः।परोपकारशीलः।गीतज्ञः।संग्रामनिपुणतः।अदानानिर्भयः।अर्थोपार्जनप
रः।ईदृशो मिथुनकन्यास्थे कुजे।।६ धनी।जलयानेन प्रवासादिना सम्पन्नर्जितंधनं मेना सद्याजले
नगमनेन यो पार्ज्जितधनः।मेधावी।अंगहीनः।कुलीनः।ईदृशः कर्कगे कुजे।७।।१८।।सिंहधनुर्मी
नकुंभमकरगकुजफलं शार्दूलेनाह।।निःस्वरति।।निर्द्धनः।कदर्थनासमः।अल्पमध्यचारी।स्त्री
ककलत्रः।स्वल्पापत्यः।ईदृशः सिंहगे कुजे।।८ अनेकशत्रुः।राजमंत्री।प्रथितः।निर्भयः।स्वल्प
प्रजः।ईदृशो धनुर्मीनगे कुजे।।९ नित्यदुःखी।निर्द्धनः।भ्रमत्ताशीलः।मिथ्याभाषी।निरपेक्षः।ईदृ
शः कुंभगे कुजे।१ बहुधनः।बहुपुत्रः।राजा।तत्तुल्यो वा।।ईदृशो मकरगे कुजे।।१२।।२०।।इतिकुज
राशिशीलं।।मेषवृश्चिकवृषतुलास्थे बुधे फलमाह।।घृतेति।।अज्ञानेस्तेपरस्वहरणेमघपा राम
नेवासक्तः।।शास्त्रार्थदूष्यकः।तस्करः।दरिद्रः।कुत्सितभार्यः।दांभिकः।अनृतभाषी।ईदृशो मेषानि

जातः ॥९॥ नित्यमिति ॥ सर्वदा स्त्रीयानकनत्रपुत्रानाराधयति। दांभिकः। अधोभागे दुर्बलः ॥ शोभनने
त्रः ॥ कृशजघनः। उत्क्रयाहकः। पटुव्यतेन सकृद्देवगम्भानीत्यर्थः। सर्वजनप्रियः। आलस्योपेतः। शी
तं न सहते। भ्रमताशीलः। रुद्रारपेक्षः। कविः। लोभाभिभूतः। अगम्यासुखचणोत्रजास्तु निकृष्टजातिषु वजरां
गनासु च स्त्रीषु च प्रसक्तः। निर्लज्जः। निर्दयः। ईदृक मनुजो मकरगते चंद्रेजातः ॥१०॥ कुंभगचंद्रफलं
नर्कुटकेनाह ॥ करभेति ॥ उन्नसमुखीवः। शिराव्याप्ता कर्कशा लोम बहुला अत्युग्रा तनुः शरीरं यस्य।
विस्तीर्णौ पादौ सक्थिनी देहपश्चिमभागो नितंबस्थानं मुखं बस्तिश्च यस्य। बठरो मूर्खः। परनार्यां
परधने पापे वासक्तः। उपचयापचययुतः। प्रियाप्तिपुष्पं समालंभनं मित्राप्ति च यस्य। मार्गश्रमः।
ईदृक कुंभगे चंद्रेजातः ॥११॥ मीनचंद्रफलं मालिन्याह ॥ जलचरेति ॥ जलोत्पन्नानां मुक्ताफलादि
धनानां परधनानां च भोक्ता ॥ स्त्रीषु वस्त्रेषु च प्रेमवान्। अन्यूनाधिकं सुदृशं च शरीरं यस्य। उच्चनासिकः।
विस्तीर्णमस्तकः। रिपुपराभवकारी ॥ प्रमदावश्यः। शोभननेत्रः। कांतिनिधानधनानां भोक्ता। शास्त्रवित् ॥
ईदृक मीनगे चंद्रेजातो भवति ॥१२॥ उक्तराशिस्वरूपं भ्रमरविलसितेनाह ॥ बलवतीति ॥ चंद्राक्रांतराशोतस्य

शिनाथेवद्देवबलितिः। एवंत्रिषुबलवत्सुतुंगेक्रमफलंपूर्णंभवतितित्र्यामध्यात्तदपोर्बलिनोमध्यफलं।एकस्मि
नबलिनिहीनं।त्र्यपात्ताम्बलस्थेत्वेप्रोक्तंफलंकिंचिन्नस्यात्॥अन्येपिरव्याहस्पष्टंदवस्थितनीपाः।अपम
र्थः।पत्राशोरविकुजाद्यस्तद्धाशोतदीशेरव्यादेवबलवतिवस्पमात्तंफलंपूर्त्तं।त्येकयोर्बलिनोमध्यमं
नं।त्रिषुबलेषुनकिंचिदिति॥१३॥इतिवेद्याशिस्वभाव।श्रीनरकेसरिगजलपनाम्यो नमः॥मेषव्रषाताकर्क
लमोपव्यदत्तिकेनाह॥प्रपितद्दति॥विख्यातः।दत्तः।भ्रमणशीलः।किंतुस्थिरोबहुधनः।शस्त्रधारीभिःसे
व्यश्च॥१॥गवीति॥वासोभिःसुगंधद्रव्यैःपत्येष्वजीवति।स्त्रीद्विष्टा।गीतेवाद्येवदत्तः।ईदृग्वृषोर्केजातः॥२॥
मिथुनादिवत्तुष्काकफलशाई नविक्रीदितेनाह।विधेति॥पंचविद्दतः।ज्योतिःशास्त्रवेत्ता।धनी।ईदृग्मिथुन
गेर्के॥३॥उग्रोनिरपेक्षइत्यर्थः।निर्धनः।अन्यकार्यकर्ता।खेदेनमार्गेतादुःखेश्चसदापुक्तः।ईदृक्कर्कार्के॥४॥अ
रत्येपवर्तिगोष्ठेवप्रीतिर्यस्यतद्वासशीलइत्यर्थः।बली।मूर्खः।ईदृक्सिंहगेर्के॥५॥पलिपिरक्तान्यासी॥ले
ख्यचित्रकर्मादिकविचं।गत्तितशास्त्रं।विज्ञानंवा।एतैर्युक्तः।नारीतुल्यशरीरः।ईदृक्कन्यागतेर्के॥६॥१५॥
तुलादिवत्तुष्कफलंशाद्दूलेनाह॥जातइति॥मघविक्रयी।पपिद्यासक्तः।सुवर्णकारः।अनुचितकर्मकर्त्ता।ई राम ८५

नारीवश्यभिलाषुकः। कामशास्त्रकुशलः। रक्तनेत्रः। पंडितः। परसंदेशप्रापकः। कुटिलकेशः। वकुलु
रधीः। हास्यविघितघूतानि वेत्तीति। सुंदरदेहः। मधुरभाषी। बहुभुकागानरतः। नत्पन्नः। षंढैः सहप्री
तिपाशउन्नतनासिकः। ईदृग्मिथुनगेवं द्वेजातः। ३। आवर्त्तेति। कुटिलशीघ्रगामी। उच्चजघनः। प्र
मदाभिभूतः। शोभननमित्रः। ज्योतिःशास्त्रवेत्ता। बहुगृहः। वहुवस्त्रपेत्ता धनेनवपुज्यते। कदाचि
द्धनी। कदाचिन्निर्द्धनः। इत्यर्थः। वामनः। लघुलकंठः। सांचेप्रीतिं याति। मित्रेषु नुरक्तः। जलेउद्यानेच
प्रीतिमान्। ईदृक्षकगेवं द्वेजातः। ४। तीर्त्थेइति। अमर्षशीलः। व्हहत्कपोलः। विस्तीर्णमुखः। कपि
लनेत्रः। स्वल्पापत्यः। प्रमदाद्विष्ट। प्रियामांसवनपर्वतापस्यसः तिः। कारताकोपशीलः। बुभुक्षापि
पासाजठरदशनविन्नैरुस्तस्यन्नरोगोत्पत्तिः। दाता। पराक्रमी। एकवित्तः। अभिमानी। जननीव
श्यः। ईदृक तिहगेवं देजातः। ५। श्रीदेति। लज्जालस्याभ्यांमनोहरेदर्शनिगमनेयस्यसः। शिथिलस्कंधः
शिथिलभुजश्चास्थूलवपुतः। मृदुचका। सत्यभाषी। गीतवाद्यनृत्यपुस्तादिकलासुचतुरः। पंडितः। ध
र्मरतः। बुद्धिमान्। संभोगलालसः। परकीयेवैश्माभिधनेच्छयुक्तः। अन्यदेशवासी। प्रियभाषी। स्त्री

जनकः। लोकसंतानः। इह कन्यास्थे चंद्रे जातः स्यात्॥ ६॥ देवेति॥ देवानां विप्राणां सतां च पूजने तत्प
रः। मेधावान्। तदुक्तं। अतीतानां स्मृतिर्मेधा। बुद्धिस्तत्कालवेदिनी। शुभाशुभविचारज्ञः प्राज्ञः प्रोक्तेनद्य
हृतरति॥ श्रोत्रियः। नारीप्रशः। उग्रः। उग्रघाता। दुर्धर्षजनशिथिलशरीरः। प्रमत्तः पृथ्वीलः। धनी। अप
रिपूर्णविपत्तः। रूपविरूपाभिज्ञः। देवद्विजानां। सुरपर्पापं द्विती पंनामपत्नी स्या। रोगवान्। स्वजनाना
हितकारी। तैर्बंधुमित्रैर्मिश्रितो। सत्यस्तपकृच्छ्रा। इह तुलास्थे चंद्रे जातः॥ ७॥ वृश्चिकस्थे चंद्रफलं मालि
न्याहा। पृथुलेति॥ विस्तीर्णनेत्रवक्षस्थलः यस्य। वर्तुलजंघोरूजानुर्यस्य। मातापितृभ्यां उप
देशकरैश्चतुष्कः। बाल्ये रोगी। राजकुले मान्यः। कपिलः। विषमस्वभावः। मीनवज्रपत्रितांकृका
क्षिकाणिहस्तादे यस्य। गुप्तपापः। इह वृश्चिकगे चंद्रे जातः॥ ८॥ धनुर्मगयोः फलं शार्दूलाभ्यामाह॥
व्याप्तिघ्येति॥ दीर्घमुखग्रीवः। पितृसंबंधिधनेन युतः। दाता। काव्यज्ञः। बलवान्। मोघसत्त्वशीलः।
स्थूलदंतः। कर्तात् उच्चो नासिका यस्य। कार्येषु धर्मी। लिपिपुस्तकवित्तरः। नतस्कंधः। कुत्सितनखः।
पीनबाहुः। धार्ष्टपुरुषः। धर्मज्ञः। बोधवद्वेष्टा। हठाद्वशे ना याति। सांत्वनेनैव वशः स्यात्॥ इह धनुःस्थे चंद्रे राम ८

ईदृक्हस्तजः॥१३॥७॥ चित्रेति॥ नानाविधवस्त्रपुष्पधारी शोभननेत्रो वपवः। ईदृक् चित्राजः॥१४
विनयी। रूपविरूपविरादयालुः। अभिमतभाषी। धर्मरतः। ईदृक्स्वात्यातो।१५॥८॥ ईर्ष्युरिति॥
परर्द्धिमत्सरी। लोभाभिभूतः। सुरूपः। संभाषणादरतः। विरोधरता। ईदृक् विशाखाजः॥१६ ईश्वरः।
परदेशवसनशीलः। क्षुधाया असहनः। अमता। ईदृगनुराधाजः।१७॥९॥ ज्येष्ठाख्येति॥ स्वल्पसुहृत्॥
संतोषी। धर्मस्थितः। भूरिरोषः। ईदृक् ज्येष्ठाजः॥१८ गर्वितः। बहुधनः। सुखवासी हिंसातिबलः। एक
मतिः। भोगरतः। ईदृङ्मूलजः।१९॥१०॥ २ षेति॥ इष्टमभिमंतमादेहजनकं च कलत्रं यस्य सः। गर्वितः।
स्थिरप्रेमा। ईदृक् पूर्वाषाढाजः।२०। विनयी। धर्मज्ञः। प्रभूतसुहृत्। उपकारविदितः। ईदृक् श्रवणजः॥२२
दानशीलः। ईश्वरः। रत्नप्रियः। गीतवल्लभः। अर्थपतिः। ईदृग्धनिष्ठाजः॥२३॥१२ स्फुटवागिति॥ स्प
ष्टवचनः। स्त्र्यादिव्यसनोपहतः। शत्रुघातकः। असमीक्षितकार्यकर्ता दुराराध्यः। ईदृक् शतभिष
ग्जातः॥२४ दुःखितमनाः। नारीपरिभूतः। धनी। प्रवक्ता। धनपदुरिति पाठे स्त्रीभिरर्जितधनं यस्याप
क्षा धनपटुर्धनार्जनेचतुरः। धनसंचयकरः। ईदृक् पूर्वभद्राजातः।२५॥१३॥ वक्रेति॥ भाषणादरतः। स्त्र

८३ खपुतः।बहुपुत्रपौत्रः।जितारिः।धर्मशीलः।ईदृग्उक्त राज्ञः।२६ सेपूर्त्ता वपवः।जनप्रियः।रताप्रि
यः।परधनादिषु लुब्धः।धनी।ईदृग्रेवतीजातः।२७।। एतेनक्षत्रस्वभावाश्चंद्रेसबलेपूर्त्ताः।पष्ठेम
ध्याः।अबले ऽल्पाः।।१४।।इतिजातकविवरत्तोमहीधरकृतेनक्षत्रशीलं।।श्रीनृसिंहगत्तोशाम्पो
नमः।। ।।अथमेषादिसप्तशशिगतवंद्रफलातिसप्तशार्दूलविक्रीडितेराह।।घत्रेति।।वर्तुलरक्ते
वनेत्रेपस्पसः।उष्णभोजी।शाकभोजी।स्वाल्पभोजीच।शीघ्रंप्रसीदति।अमताः।रतप्रियः।निर्मांस
जंघोरुसंधिः।वलधनः।रताप्रियः।स्त्रीप्रियः।परांगधनकुशलः।कुत्सितनखः।भयमूर्छा।गर्वितः।
मानमुख्यः।गुतीत्स्पर्धः।शत्रुपाविक्रमविशेषेताहस्ततलेविक्षितः।क्रियापाश्चनवस्थितः।जलेसभयः।
ईदृक्मेषस्थेचंद्रेजातोभवति।।१।।कोतरति।।सुंदरः।विलासंगामा।विस्तीर्णोरुमुखः।पष्ठमुख
पार्श्वेषुविक्रवानाहाता।कंदर्पनासपर्धः।अप्रतिहताज्ञः।उन्नतस्कंधः।स्त्रीजनकः।कफाधिकः।
प्रथमजैः कूटंबैर्विंत्तैःपुत्रैश्चरहितः।जनप्रियः।दृढमित्रः।जपावान्ताप्रदीप्तोदरानलः।स्त्रीप्रियः।
दृढमित्रः।पौवलेवाईकेवसुखी।अथादिवबाल्येदुखी।।ईदृग्वृषस्थेचंद्रेजातः।।२।।स्त्रीलोलइति।। राम ७